काणां नानात्वापत्तेः वाचस्पतिमिश्रास्तु ज्ञानस्य विषयनियमः कारणाधीनो नित्यस्य तदभावात् नियतविषयत्वमित्याहुः तन्न एवं स
ति जन्यज्ञानस्य कुत्रचित् किंचित्प्रकारकत्वं तत्कारणविषयाधीनमिति नित्यस्य तथात्वे सर्वप्रकारकतापत्तेः ईश्वरे भ्रमत्वापत्तेः
अयथार्थमपि दोषाधीनमिति तदपि तथात्वे स्यान्निवर्त्तत इति चेत्तर्हि भ्रमप्रमाविभागानिष्प्रकारकमेव स्यात् तत्प्रकारकताया अपि
कारणाधीनत्वात् परिच्छिन्नप्रकारतानकारणाधीना सर्वप्रकारकत्वं धात्मकतद्भागकोऽदोषः न वीनाम् जन्यस्य तन्नद्विषयत्वे तत्प्रयोज
ककारणाधीनेन तस्य विषयताविरहेऽपि तत्प्रयोजककारणविरहात् तथा च तद्विषयत्वनियामकस्याभावाच्च नियतविषयत्वनि
वर्त्तत इति सर्वविषयत्वं तस्य विषयता ज्ञानस्य दोषाप्रयोज्या भ्रमताप्रयोज्या प्रमा यत्र जन्या यो नास्ति सा नित्यज्ञानेऽपि नास्ति

सि-र्० २८

28

दोषजमलविरहादेवेति नभमलमिति। तन्न ज्ञानस्यानियतविषयत्वं यदि सर्वविषयत्वं तदा तत्तामात्मस्वरूपगाजन्यज्ञानवतोपि सार्वज्ञ्यापत्ति
रिष्यतादृशसर्वज्ञत्वाभावे जीवेनार्थान्तरत्वात्सर्वप्रकारकज्ञानवत्त्वात्तु विनामप्रमातुः सार्वज्ञ्येन प्रमातृशक्तेति युक्तितोपि नाधिकमिति कृरितिस
र्वसंशयविरोधिज्ञानत्वमेव सर्वविषयत्वमिति चेत्सत्यं तिरस्कृतं किंलि दृष्टा वदन्मसिद्धं नानुमानगम्यः सर्वज्ञ इति युक्तिस्तु नैवं रूपता विषयः
पदार्थवाक्यार्थरूपाभ्यामभिन्नत्वात् एवं यैः केवलं ज्ञातमिन्द्रियाद्यनपेक्षिणः स्वस्मात्तीनादिविषयं जीवस्य परिकल्पितं तदप्यप्रामाण्यं वि
ज्ञेयेन रहितत्रापि पत्मना एवं किलकेषांचिद्दर्शने बोधस्वभावः पुरुषो देहेन्द्रियादिवशः किंचिदेव जानाति विगलितनिखिलकर
णकलेवरादिस्तु केवली भूतो विश्वमेव स्वस्मात्तीतनादिरूपमपरोक्षमीक्षते तत्र केवलजीवे ज्ञाने केवलज्ञानमिति मुक्तात्मनो सर्व
गोचरं ज्ञानमावृणुते तत्रापि प्रमाणाभावः प्रत्युतस्याद्दशाभेतिनेतिभेदप्रपंचविलये वेदान्तेषूपदिश्यत इति तदतिरिक्तातीतादि
तत्सम्यक्चाभावात्तथावेपि नेनसहवेधाभावात्कथं तज्ज्ञानेन सर्वज्ञता अथ बोधस्वभावस्य किं संबंधान्तरेण नचैवं पुनरपि वेधाप
त्तिः अखिलकर्मरणात्तदर्जितकारणान्तरे हस्य वा भावादिति चेत्प्रमुक्तस्य बोधरूपताय दिविदेनावगम्यते तदा तस्यासंगतापि तत
एवावगम्यत इति कुतः अपवर्गविषयता प्रमाणानां तांतु न स्वबोधरूपत्वेनास्येवेति कुतः सर्वविषयत्वमिति तस्मान्नसंते वातीन्द्रिया
विषयाः अथाभावः स च भावान्तरात्मं तमभिन्नो ऽभिन्नो वा न तदाद्यः न त्यसंतमभेदोस्तिरूपादिवदिन्द्रियापिनः घटादिकमेवहि कदाचित्सदा

एम° २८

त्सनागत्यते घटोस्तीत्याद्याकारेणावगाहितु अभावात्मना घटो नास्तीति कोर्थः घटोऽभावात्मना नास्तीत्यर्थः न त्वभावः पदार्थान्तरं प्रमाणा
भावात् किं त्वभावत्वं भावत्वमिव धर्मविशेषः एकस्मिन्नपि धर्मिणि धर्मद्वयकल्पनवैयर्थ्यापत्तेः न च विरुद्धद्वयं प्रमाणावलेनाविरुद्धतयैवति
ष्ठेः अन्योन्याभावोऽपि च पटाद्यात्मकं भावान्तरमेव अन्योन्याभावत्वं तु तेष्वेकमतोनानानुगमः तदाहुः भावान्तरमभावो ह्यन्यो न कश्चिदनि
रूपणादिति अभावो हि न कश्चिदतिरिक्तः कुतः अतिरिक्तस्य तत्र स्वभावादत्यन्तभिन्नत्वेन गवाश्वयोरिव प्रतीतेः न च नास्ति अन्योन्याभा
वप्रतीतेः सालंबनत्वात् नहि कोऽसौ भावान्तरं पटरूपस्य घटभेदबुद्धिस्तस्मिन्नभावत्वस्यार्थः घटो घटो नेत्यस्य घटो घटभेदाभिन्न इत्यर्थः तदाहुः
धर्मिणो भेदरूपो हि धर्मभेदो विनिःस्थितेः अन्यद्विपटादेर्धर्मिणा एकस्यैव पटादित्वमन्यभेदत्वमित्यर्थः अत्र घटसंसर्गाभावानधिकरणत्वं तु न
घटाभावत्वं अनुगतप्रतीतेर्घटात्मकाभावविषयत्वेनैवोपपत्तेः योग्यानुपलब्ध्याभावत्वमेवं विरुद्धमप्ययं अन्योन्यं घटत्वेन नास्तीति
प्रतीतेरन्योऽपि घटत्वात्मनाभावात्मकः इत्येव विषयः तर्हि घटस्यात्मनान्योऽस्तीति किं त्वन्यात्मनेति तदाहुः स्वरूपपररूपाभ्यां नित्यं सदसदा
त्मके वस्तुनि ज्ञायते किंचित् किंचिद्रूपं कदाचनेति एवं च सति घटवति घटाभावो नास्तीति प्रतीतिरभावत्वप्रकारिका घटविषयिण्यपि
भ्रमैवेति तेनैवोपपत्तौ नाभावाभावः स्वतंत्रः सिध्यति ध्वंसोऽपि च विनाशाख्यत्रिपोगोगात् घटादिरेवेत्युक्तं एवं च घटो नास्ति घटो न स्त
इत्याद्यौ नार्थसंख्यो न वोपपत्तेर्नैव प्रतीतिरिक्ताभाववादिनां तु तत्र दुर्घटता अभावप्रतीतियोग्यघटोऽस्ति त्वेवान्वयेऽप्युपपद्यते तदाप्यनुपपत्तिः

मो॰२॰
२९

29

नाद्दशत्वबहारकाारणाभिमतमस्य यस्यमतियोग्यत्वंमनिकर्षे रागमतियोगिविशेषकत्वायोगात् पाकजमध्वंसात्परः कालः स्वेतरमत्यपः
पावजभावध्वंसात्परः कालस्त्र महाप्रलयः इत्यावक्षतेवैशेषिकाः ननु तत्काले जातिः कुत्र स्यादिति न च काल एव तस्याश्रयत्वमिमात्रप्रदे
शत्वात् न च नश्यतिनित्यत्वात् नावशेषवतस्याः स्पष्टिकाले सृष्टिरयुक्ता चेतिजातिशक्त्युपादानानां नार्थनापत्तिरितिचेन्नकालस्य सर्वा
धिकरणतया प्रमितेस्तत्साक्षिकमात्रदेशतानंगीकारादित्याहुः तत्र तादृशकाले प्रमाणाभावात् तदाहुः प्रलयेपि प्रमाणानः सर्वो
छेदात्मकेन हि न च प्रयोजनं तेन स्यात् प्रजापतिकर्मणां सर्वप्रलयविज्ञानं समस्तजगदाश्रयं स्वशरीरविदां पुंसां नाधिकेतो १७ अत्र
इति स्वआत्माशरीरस्यात्मन एव भेदेवदनादेवापवर्गप्राप्तेः यदाहि शरीरेः सनित्यात्मबुद्धिवलमतयो विलीयते तदा पंचात्वस्वहेतु
भ्यः कर्मभ्यो विनिवर्तते तदा देहत्वभावादेव मुच्यत इति शारीरात्मविकज्ञानमेवार्थनीयं नाम तदा किमनेन अयुक्ताव्यक्तमेदभिन्नमंसंता
एभ्युपगमेनाप्रमाणिकप्रधानापरनामधेय १७ एणुहत्वविवेकेनेति अत्र वदन्ति भाष्यकाराः सर्वैः प्रमाणैः कदाचित्समग्रोत्पादेप्रमंव
यत्नमाः आरंभकत्वात्तेनघपवनारंभकपरमाणुवदितिप्रलयेनुमानंप्रमाणमित्याहुः अत्र यद्यप्येककालीनसमग्रोपादेयप्रम
मत्वं न समाहितं प्रसिद्धसमग्रोपादेयप्रवंधप्रध्वंसे प्रमाणाभावात् तदाहुः प्रलयेपि प्रमाणानः सर्वो छेदात्मकेन हि न च प्रयोजनं तेन
स्यात्प्रजापतिकर्मणां सर्वप्रलयविज्ञानं समस्तजगदाश्रयं स्वशरीरविदां पुंसां नाधिकेतो १७ अत्रेति स्वआत्माशरीरस्यात्मन

एम॰
२९

अभेदे वेदस्यादेवापवर्गप्राप्तेः प्रत्यादिशरीरैः सनित्यात्मश्रुतिहत्वमतयो विलोपं ते तदापं सत्वकुअलहेतुभ्यः कर्मभ्यो विनिवर्तेत तदा हे
तुभावादेव प्रमृतत्वातिप्राणिनात्मविवेकज्ञानमेवार्थनीयं नाम तदा किमनेन व्यक्ताव्यक्ताभेदाभिधानेन तत्त्वाभ्युपगमेनाप्रामाणिकप्रधाना
दिनामधेयगुणपुरुषविवेकेनेति अत्र वदन्त्याचार्याः सर्वे परमाणवः कदाचित्सत्ता समग्रोपादेयमवं धर्मिमाः आरम्भकत्वात् न घटपट
नारम्भकपरमाणुवदिति प्रलये त्वनुमानं प्रमाणमिमाहुः अत्र पक्षे एकैककालीनसमग्रोपादेयमत्वेन प्रसिद्धमिति समग्रोपादेय
मवं धर्मसत्त्वं साध्यं तथा च क्रमेण तादृशसाध्यसत्त्वात्सिद्धसाधनं तथाप्येककालीनात् इति पक्षविशेषणं बोध्यं पक्षतावच्छेदेन
साध्यसिद्धेरुद्देश्यत्वान्न सिद्धसाधनमिति अत्र पृ पि तथाप्येककालीनत्वसमयकः कालोपाधिः पक्षतावच्छेदकः द्रव्याधिकरणीभूतत्व
क्षणो वा आद्ये बाधः तादृशोपाध्यवच्छिन्नस्य कार्यत्वात् अन्त्ये पक्षविशेषणासिद्धेः प्रलयाभिहितिति द्रवणो कालोपाधित्वेनप्र
वेशात् अथवाबाधात् द्वितीयमादायोसाध्यपर्यवसाना न तथापि कार्यद्रव्याधिकरणवृत्तित्वमात्रोपाधिः अप्रयोजकत्वं च अ
न एव परमाणुः कार्यद्रव्यसमानकालीनपरमाणुक्रियाजनितक्रियावान् सत्तावादिसत्त्वात् प्रलयपरमाणुः कार्यसमानकालो
नतद्विभिन्नध्वंसाध्वंसवानिति प्रलये साधनं कस्य कस्यचित् पार्श्वे अप्रयोजकत्वं तदप्रयोगात् तत्सोपाधित्वात् एतेन एते परमा
णवः कार्यद्रव्यानधिकरणवृत्तिकार्यवन्तः नित्यद्रव्यत्वादाकाशवदित्यपि नापास्तं कार्यद्रव्यानधिकरणस्योपाधित्वात् अ

मी०१०
३०

30

पकार्यदृष्टाणि कार्यदृष्टानधिकरणवृत्तिध्वंसप्रतियोगीनि कार्यभावत्वात् ध्वंसप्रतियोगित्वाद् घटादिवत् नचाकाशवृत्तिध्वंसप्र
तियोगित्वेनार्थान्तरतावाधात् नच विभुवृत्तित्वमुपाधिः परमाणुसंदादैर्माध्याव्यापकत्वात् गगनादिवृत्तिध्वंसप्रतियोग्यवृत्ति
दृष्टत्वं कार्यदृष्टानधिकरणप्रागभावाधिकरणवृत्तिध्वंसप्रतियोगिवृत्तिद्दर्शितं न कार्यसमवेतत्वादनादिनावच्छेदकत्वात् गगनादि
वृत्तिप्रागभावप्रतियोग्यपुष्टः कार्यानधिकरणवृत्तिप्रागभावप्रतियोगीकार्यत्वात् घटवदिति अनुमानं न लिवितिचेत् आप्रयोजक
त्वात् कालोपाधित्वं कार्यत्वव्याप्यं कालोपाधिमात्रवृत्तित्वात् एतत्कालत्ववत् ब्राह्मणत्वं ब्राह्मणजन्मत्वाभाववद्देहेतिब्राह्मणा
मात्रवृत्तिधर्मत्वात् एतद्ब्राह्मणत्ववदिति तद्विपरीतसाधनत्वाच्च न चाप्रयोजकत्वं कार्याभावे जातिमात्रभावापत्तेः तेहि व्यक्तिं विनापि
जातिस्थितिरिति तस्माद्व्यक्तिभेदात् व्यक्तिमात्रनिष्ठत्वात् जन्यप्राकदाचिद्विध्वंसप्रतियोगित्वं स्यादित्यादिस्याद्वैविध्यतीत्वमथाब्राह्मणत्वस्यनाना
त्वापत्तेरिति अनुकूलतर्कसत्वात् आगमानुमानोपष्टम्भकत्वाद्वाप्रयोजकत्वमनुमानानामिति चेत् न निमित्तं पेक्ष्य सवत्तारोच्छेदा
दागमस्याप्यप्रामाण्यापत्तेर्न तस्मात् किं तु कर्मणः सत्त्वापरत्वमेव तत्त्वमीदृशं कर्मफलप्रदानशक्तौ पभोगायस्मिन्नपि विद्धे नफल
मिसेतमाः किं वा जगदुपादानपरएव तदाहुः सतिवा कपरस्वैव जनानामिति विभ्रमः वैशेषिकाणां मतः शाक्यौतां कुहतैमतिमिति
नचेश्वरएवप्रयोजकतत्कलाभाव यदृच्छावादयतीति वाच्यं नानादेशीयप्रमादनायतनदेशीयानेतशाक्यनापातात् अथ नानादे

एमं
३०

शीघ्रशरीरारम्भे वा विशेषप्रसादयतीति चेदिदमपि न प्रमाणेन विना शक्यं वोढुं यत्र लिप्सादि तं प्रमाणापर्यं मपि मानाकायकत्वमना आवेशकत्व
नावास्त्येवाधिका अपि त्यागमंविनाऽप्रयोजकाद्गुमानमहत्त्वा स्वतन्त्रैश्चिद्धिस्त्यागमस्याप्यिमामाणं पुकष्यवैदिकसंप्रदायं प्रविनेति तदुपपत्तये प्र
लपो नास्त्येव नित्योद्योम्यमिति दिक् अभावस्य कश्चिन्मरमणप्यार्थोपि स्वाम्य पपप्रत्येव तदुःखाधिकरणशास्त्रणाहतिः स्वाप्यपपत्तमेव तदुःखाधिक
रणामणा हतिभ्यो भिन्नेवा योदुःखध्वंसो मोक्षापरनामा तस्य चोत्पत्तिप्रकारो वार्तिके वर्णितः तत्र ज्ञानात्मतत्त्वानां भोगात्पूर्वं क्रियाफले पेउ
त्पाप्रबुधानता देहोनोत्पद्यते पुनः कर्मजन्मोपभोगार्थं शरीरं न प्रवर्तते तदभावेन कस्यचिद्धि हेतुत्वस्याभावतिष्ठते मोक्षोपरं न प्रवर्तते तत्रका
म्य नित्यविरुद्धयोः नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ज्ञात्वा मात्रं फलं ज्ञातेन चानिष्ठो भेविष्यति आत्मज्ञे चैतदस्तीति तज्ज्ञानस्य पपुअ
प्रइति ननु कर्मणां न देहकारणत्वं किंतु स्वर्गादिकारणत्वमेव प्रपद्यते न चतत्त्वदर्शनाद्यापारस्तपाप्तमैहिककर्मफलं मोक्षेदमहेण ननापिश
रीरफलत्वकमेव किंचित्कर्मास्ति अतः सुतमपि कर्मस्य पेशरीरस्यादेवेत्याशंक्याह कर्मजन्मेति कर्मशेषफलोपभोगार्थं हि शरीरं जायते अशेषक
र्मभावे तु शरीरं न जायते कारणाभावात् न च मातापितृसंयोगमात्रं तद्धेतुः क्षेमिश्रागरिमाह न कस्यचिद्धेतुत्वं नास्ति उत्तमं च यास्तत्वविद्गणो
मोक्षापरनिकाम्यसंबंधहेतुस्त्वफलत्वोत्तानि विरुद्धप्रयावारणहेतुत्वमिति न प्रवर्तताम् नित्यनैमित्तिके यदि कुर्यात्तदा तत्रावश्यानुषंगि
कफलसंबंधहेतोः सहेनमपवदोषः अथ ते अपि मामेतदाप्रसवायाव्छरीरे मा देहदुर्वोरइत्याशंक्योपमप यैत्रवर्णितामाह निसाथि नाप्रविष्ण

मो॰ ९
२१

3

तीत्यादिनित्यनैमित्तिके प्रत्यवायपरिहारस्य कार्यत्वं परिकल्प्य कार्यमपि तयोः प्रयोगः स्मार्त्तः न च तथापि नित्यप्रयोगेपि कर्मणएकत्वात् काम्य
फलं स्यात्तस्मात्मध्ये स्नानान्नरकाद्युफलकामनापूर्वं गंगास्नानाभावादिः साध्यकोक्तेर्मार्थ्यमानस्य फलत्वानास्ति विधिनासमर्थी हि तस्यैव भाव्य
मानत्वबोधनादित्याशयः पशुस्वर्गकामादिश्रुतिभ्य उपादेयमत्र स्यकर्तु विशेषणीभूता कामना श्रूयते सापेक्षे कर्तव्य विधिस्मितेति तत्कुत्रास्तीत्युवा
द्योपायोगविशेषात् तस्मात्त्वयापि प्रतीयेत ते निवारणाय गुणाधिकरणविहितं तदिह हेत्वभावादेवं बंधाभावो न तात्मज्ञानस्य तत्र कारणत्वमि
त्युपसंहरति आत्मज्ञेश्चैव तदिति तज्ज्ञाने आत्मज्ञानेनं न तु प्रकृतिपुरुषज्ञानं अथ प्रमाशयः जीवो हि शरीरमेवात्मानं मन्यमानस्तद्रूपकारणपका
रात्मसंगोत्वेरोत्पत्तिसंदधानस्तद्रूपकारिणि रमते अपकारिणि चद्वेष्टि पदाशरीरात्तिरिक्तमात्मानमपकारोपकारसंगो चामयममस्मीति वेत्ति तदाहं
कारणगमे ममकारो विश्वादिगोचरो यदि तेहमेव सर्वं पंनतदा ममेति न वेद कुतः पुनस्तद्दारापुत्रादीन् तदा चापुंचिरसंचितकुशलाकुशलक
र्मोपस्थापितं फलं स मरद्भिर्भोक्ता भुंक्ते अनागतानि च अभयविधामपि कर्माणि न संचिनोति एवं फलोदयनिहत्वेमाधीनकर्मणि अनागते च
कारणाभावादनुत्पन्ने न पुनस्तद्धेतुको स्य शरीरसंबंधो जीवनात्यस्ततो दुःखोपशमः तदेवं प्रमाणान्याज्ञानस्य मोक्षोपयोगः इममेवार्थं श्रुति
रुवदति आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति तदेवं कृत्स्नमेवात्मज्ञाने चरमंगत्वमुक्तं उप
युज्यते आत्मन्यवहितेनोनित्यनैमित्तिकमात्रानुष्ठापीकाम्यनिषिद्धेभ्यो निवर्तते ततो हेत्वभावान्मुच्यते आत्मज्ञानेकार्यकर्मानुष्ठानं चेति रिद्दिशोप

रामं
२१

त्वात्कर्मसमुच्चयपरत्वमेके तच्चेदं स्वात्मप्रत्यूहबाणा योक्तं न वार्त्तिककृतां मते यदाहुः कर्त्तव्यं पुरुषार्थं च तत्संयोगरूपं स्मृतः सर्वत्रैव विज्ञानं हेतुत्वार
त्वेनगम्यते योगेनात्मविज्ञानारम्भेनैष्ठवधार्यतां आत्मज्ञानं हि कर्त्तव्यं पुरुषार्थं न प्रज्ञापयते ते न विना परलोकफलेषु कर्मसु प्रवृत्तिनिवृत्त्य
संभवात् तेनाविनाशी वा अरे यमात्मा इत्यादिवाक्यजन्यमात्मज्ञानं तद्रूपं न विधिवाक्याद्देव कर्मज्ञानं वत तदुपपन्न विधिवलादेव कर्मज्ञानवत्तामप्यो
वेककर्त्तव्यं यत्तु आत्मस्वभावश्रुतिपादनावसरे विधिमस्पवाक्यं आत्मा वा अरे द्रष्टव्यः स्मादि न तु दृष्टमात्मा प्रार्थस्याविगहनता स्मरेणोपयोगिता
स्यात्मस्यहितास्वरूपविशेषणावभ्यमाणमर्थं प्रतिपद्यतामिमेतावन्मात्रार्थं अनन्यथा हिन्नपेमापतो जानन्नपि अतिरिक्तमात्मानं प्रत्येवं न पियो पनि
षध्यः शरीरमात्मानमभिमन्यत एवेति कदाचिद् तिक्रामेदपि प्रमादवशविधिनिषेधावितितन्विकृतेनयुग्मपदेशाः दुरधिगमः तल्लुप्यमगोवरे
धीनामपि देहग्रहाणि निद्धिः पंडितोऽपि पुरुषो न रूपतो वाने वहितामपि समनार्थमेवात्मज्ञानोपदेशाः इति साधुभावत्वानियमवत् यथा हिसा
धोर्निस्यमानेमाधोस्वामर्तनात् श्यामादिकासाधुभावत्वानि वृत्त्यर्थे भाष्यमाणायद्साधुशब्दनियमेवं विपद्यते यत्साश्रयेन यतुक्षयमात्यात्ययहतपा
विजो विमर्शविशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः तयात्मतत्वावबोधस्य तत्पात्मानमुपासी
तेति कामवादलो कवादलोकवादवचनविशेषैजिज्ञासामननमपहि तनिर्धृतमक लोपाधिकेवलावबोधपर्यंत स्फुरत्तात्मतत्वस्तानविधान
मनाम्पवाद्विहितमप्ययनतावस्याकारणि कः क्रतुसंबंधः तदाश्रयाभिवातिक्रतुसंबंध स्तुवादिप्रयोगोपयोगिनमपदस्मेवानेकान्तिकक्रतुसंबंधा

समंतं धातक्रतुसंबंधविरोधात्मज्ञानतान्तु तस्य हृ सार्थमेव फलं प्राप्नुयुरपि चैः श्रेयः तथा सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति तथाह
पितृपितृलोककामो भवति संकल्पादेवास्य पितरः समुत्पतिष्ठंते तेन पितृलोकेन संपन्नो महीयते इति तथा सत्वे समावर्तेपन्न यावदायुषं ब्रह्मलोकम
भिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते इत्यात्मकपरमावस्था मा मिश्रणनत्वात्कर्मैतयामंत्री पतरति कृत्स्नं प्रधानकर्मेति चेन्न स
कुर्वन्निति नियोगभोगात् नत्वेवं ज्ञानस्यात्मनः क्वचिदपि नियोजकं चिदस्ति संभवति यतः परमात्मज्ञानमस्मेनन्यो मोक्षार्थं नचवो दितमि
त्येतत्कपंवार्तिककृतो व्याकरणाधिकारिणी पल्लवचनविरुद्धविज्ञानान्मोक्षो वेदेनचोपतरतिमोख्मनं तदूषयितातस्मात्कर्मणः फलादेव
हेतुभावेन सुच्यते नत्वभावात्मकं मुक्तामोक्षस्य नित्यत्वकारणमिति युक्ते तदपि त्वमतत्वे विरुद्धं स्यात् ज्ञानस्य मोक्षहेतुताया स्वपमेवोक्त
त्वात् यदि चाभावस्य मोक्षता स्वसंमतास्यात्तदानवक्रियायाः कस्याश्चिदभावः फलमिष्यते इति चविरुध्येत ज्ञानकर्मसमुच्चयवादिनो
मोक्षं प्रति कर्मणोपि हेतुत्वात् तथाच व्याकरणाधिकारिणो नहि ज्ञानविधाने न कर्मसंबंधवारणमिति तेन मोक्षमत परिष्कारेणैव दंवार्तिकं
पतः पृष्टं स्यमकृत्स्न मत्ताज्ञानं वेदेन मोक्षहेतु तयान विहितं न चालौकिके वैप्रमाणान्तरं प्रक्रमते अतो मज्ज्ञानस्य पत्रपमस्तः सामर्थ्येम
मीपतेन दैवतवमन्ते मोक्षः सचाभावात्मक एव वह भवति तदेवोपपादयति तत्रेति तस्मिन्नकापिलेमते विज्ञानमात्मनोकर्तृत्वं तं पैतिस्यपैः य
दाहिस्वकृते विविक्तः पुरुषो ज्ञानतत्त्वादुच्छ्वसन्तत्कृतकर्मफलोपभोगाभावान्नप्रकृतिः कर्माणि रमते तदर्थाहितस्याः प्रवृत्तिर्नस्वार्थानस्याआ

32

स्यात्तस्मात्स्थितउत्तरकर्मप्रचयापादकत्वंपापानि वा विदेकदृशाप्राप्तानि तानि भोगादेवक्षीणानि पापानि वाद्रुतफलानि तानि चपरिनिवर्त्यानि तानि
वेत्यात्मनो भोगजनकानि प्रारब्धवशाद्भोगजनकानि तदा तामपि भोगतः क्षपयितव्यानि यदिलब्धविवेकस्य मत्कृतिर्दग्धपापादिकर्मणा पुनश्च
यफलमर्पयितुकामा तदापि कर्मफलदोषदर्शनजातविरागः कर्मणि प्रकृतस्याभिमानेनावभेपितिमनैमित्तिके एव कुर्यो यथास्मदभि
मतात्मनत्र इति न सोपात्यस्यानि मोक्ष इति अपवर्गेऽप्यस्मदभिमतं ज्ञानमेवानापन्नादुःखाभावायास्येपमितिअस्माकं तु नापंपक्षः
तत्त्वज्ञानविधिवैयर्थ्यापत्तेः तर्हि तस्य तत एव मोक्षसाधनतामतीते न्वौ कर्तृप्रयोजनकत्वमिति चेत्र आत्मा मत एव शास्त्रस्यार्थवत्त्वात् किं
चसाधनतावोधनस्य प्रयोजनं नेतत्त्वज्ञानप्रवृत्तेः प्रयोजकत्वज्ञानादेवोपपत्तेः यत्तु कश्चिदाह नात्मनस्तत्त्वज्ञानजन्यः कृतादेव दुःखितात दुःख
स्यात्यतो भोगादेव तद्विनाशसंभवात् तात्मा विनातत्त्वज्ञानं मन्त्रेणापि तद्विनाशसंभवादिति तन्न द्वारेणद्वारिणो मथा सिध्धभा
वात स्यातिविकमारेरपि स्वर्गप्रमकारणतापत्तेः विशप्रकल्पस्वर्गशरीरस्य मथा सिध्धापत्तेः स्वर्गसाधनतोपपादनार्थकल्प्यमानशरीरो
कंपतरममथा सिद्धपति तिचेन्न हि चाम दुःखध्वंससाधनतोपपत्तंपूर्वकल्प्यमानयात्रदुःखतत्त्वात्मसाक्षात्कारः कथं तत्त्वज्ञानममथासिद्धयेदुः
समानाधिकरणदुःखसमानकालीनदुःखध्वंसत्वजन्यतावच्छेदकं मानाभावात् समथा प्रकादि दुःखसमानकालीनदुःखध्वंससह
दिनामैवात्र समानकालीनघटत्वादिनाचजन्मतास्यादिति चेन्मात्मनयाजन्यतात्रथापि चामदुःखध्वंसस्यमतिर्ने नेनविनेस्तितहावश्यक

मो० ९०
३३

33

तं किंच यद्यपि दुःखमात्रं पापमात्रसाध्यं तथापि समानकालीनदुःखप्रागभावासहकृतं दुःखं तत्त्वज्ञानिनामेव न सर्वेषामिति तत्त्वज्ञानज
न्यं दुःखमिति स्थिते तत्र दुःखमात्रत्वेन जन्यतावच्छेदकं नापि दुःखप्रागभावसहकृतत्वमिति विशिष्य तत्त्वमिति चाप्रदुःखत्वमतदपेक्षा पा
तदा तत्रापि तत्त्वज्ञानकत्वं मम इति तेन बाधुनीयमिति तत्र तत्त्वज्ञानविधिर्वैयर्थ्यम् । तद्दोषः किं च तत्त्वज्ञानेन दुःखमनुत्पाद्य तत्र ध्वंसत्व
नोत्पादयितुं शक्यमिति तत्त्वज्ञानं तदुपाय इत्यनर्थकः दुःखोपाये महत्स्वनुपपत्तिः कथं तर्हि तपःप्रभृतिषु महत्त्वमिति चेत् पारलौकिकमहात
मर्थं प्रवृत्तिश्च न तु तपो जन्यमहतादुःखमेव नाशापि तु नात्र तत्त्वमेवानर्थं विनाशापि तु तत्साधनं वा स्वद्गुपादत्ते यद्यादुःखं मत्सालनाद्विपक
स्य दृष्टादृष्टस्पर्शेनैव ग्रस्यमिति अमत्यागनवरतमेव शिरस्ताडनादौ प्रवर्तेत न निवर्तेत च दुःखैकसाधनात्फलवतो दुःखं तान साधनाद्वा न तोपि
तावतो दुःखं दुःखाशेषत्वादेतद्विनाशस्यावश्यकत्वात् तस्यैवार्थे नाहं भवानर्थ्यमानमिति को दुःखसाधनत्वं मोमोक्षः तद्वेदुरितं आसे
ति कत्वं च तत्र ध्वंसस्य भवति यो गिसर्वापि हेतुदुरिताधिकरणाहृणाहमितेन नुमप्रपंचसंबंधविलयः त्रैधाहि प्रपंचो जीवं व्याप्नाति भोगा
यतनं शरीरं भोगसाधनानीन्द्रियाणि भोगाः शब्दादयो विषयाः तदस्य त्रिविधस्यापि प्रपंचस्यात्मनि संबंधस्यात्मनि आसक्तिकोविल
यो मोक्षः किमिदमासक्तिकृतं इति सर्वे भवानापशरीरेंद्रियविषयाणां विनाशोऽनुसंतानोत्पादानुत्पत्तिः कथमसंतानुत्पत्तिरिति चेत् उमार
कयोर्धर्माधर्मयोर्निःशेषयोरसतपरिक्षयात् सोयं प्रपंचे तत्त्वं धो वैधलक्षिमोमोक्षो मोक्षः इति कस्यचिन्मीमांसकमन्यमानस्य मनीषितं पुण

एमं
३३

देहंशतैरिन्द्रियविषयविनाशस्स्वतः पुरुषार्थत्वाभावेन प्रायश्चित्तस्यापुरुषार्थत्वानुपपत्तेः दुरितध्वंसस्य स्वतः पुरुषार्थत्वे तु प्रायश्चित्तादिसत्त्वे क्लृ
प्तत्वाद्धि दुरितध्वंसस्य तु दृष्टिप्रायश्चित्तविधिर्न तस्य तत्त्वं विनापर्यवसानं निहितस्य दुःखसाधनस्य नाशे दुःखं भवेदिति तस्मात् भवत्विदुःख
प्रागभावस्यैव पुरुषार्थत्वं तस्य पुरुषार्थत्वे तु किंवाच्यं किं हि तेन प्रागभावस्य स्थापने विनापि तेन पूर्वं तत्सत्त्वात् दुरितोत्तरकालं तस्य
दुरितनाशाधीनेति आगामिप्रागभावस्य दुरितेनैव सहस्थितेः अप्रतिमाप्रायश्चित्ते दुरितेन दुःखस्य कदाचिदवश्यजनने दुःखप्राग
भावो न स्यात् पापदुःखस्य शेषकारणेऽपि पंक्तिकालीनप्रागभावस्थले दुरितनाशव्याप्यमहत्तिनस्मिंस्तत्प्रभावस्य नरकभोक्तृ
सत्त्वादिति चेत् स्वसंसृष्टतानिति किं दुःखशेषकारणप्रागभावस्य सत्ता दुरितध्वंसव्याप्यात्तु किं पंचवृत्तिपि दुःखप्रागभावहीने पुरुषेन
तिष्ठतीति प्रायश्चित्तेन नाशितेऽपि दुरिते हा वृश्य फलं दास्यतीति प्रायश्चित्तं व्यर्थमेव स्यात् पापध्वंसस्य एव तस्य फलं स्वर्गजातात एव
तिचेत्तत्वं तर्हि स्वतस्व पुरुषार्थः ननु प्रागभावस्यापकृतथा अपप्रागभावस्यापकालमनानतत्तदुद्देशेन न प्रवृत्तिरिति चेत् अना
नतोऽपि न प्रवृत्तिः संभवति यस्मिन्प्रायश्चित्ते कृतेऽपि अवश्यं दुःखभोगप्रमेव पापत्वात् आहायापितदा लंप्रायश्चित्तानुष्ठानं मनुष्येषु
तिविचारवतः पश्चात्तापततो मरणमतीकारोपपत्तेः तस्मात् दुःखविपरिपाके दुःखहाधनमेवेति तस्मात् पापज्ञाना देवपापध्वं

समुद्दिशति ननु दुःखसाधनत्वेन ज्ञानमपेक्षते किं वा हि कण्टकनाशादौ हि पुरुषस्य प्रवृत्तिर्न दुःखाभावो संभवति विना प्यहि कण्टकनाशे
न चिरकालं दुःखानुत्पाददर्शनेन तस्य तदनुकूलस्य प्रयोजकत्वात् तस्मात् दुःखसाधनत्वज्ञानात् हि कण्टकादौ द्वेषस्तत् तस्य तदभावः पु
रुषस्येष्ट इति तत्साधने प्रवृत्तिः स्यात् कामेनापि वाच्यं तत्र गमनरागाभावात् तथैव पापं दुःखजनकत्वेन ज्ञाते तद्द्वेषविषय इति तदभावे पु
रुषस्येच्छा ततः प्रायश्चित्ते तत्साधने प्रवर्त्तते एव स्वार्थताया वेच्छाभावत्वेनैव दुःखाभावसाधारणेन हेयेन नन्दुःखाभावे दुःखाभावत्वे
न तत्साधनेन तत्त्वेन गौरवात् किं च दुःखाभावेऽपि न दुःखाभावत्वेनेच्छाविषयो भोजनानन्तरीयकस्य दुःखस्याभावेऽपीच्छापत्तौ
भोजनार्थं कृतस्याभावापत्तेः किंतु द्वेष्यदुःखत्वेन तदभावत्वेनैव तथा च लाघवाद् द्वेष्याभावत्वमेव वाच्यं ततः प्रकृतार्थे तावच्छेदकं कष्टदुःखाभा
वदुःखसाधनत्वाभावसाधारणं भवति हि सत्त्वाभावोऽपि द्वेषाद्यभावत्वेन न तथापि पापे हि बलसाधनत्वज्ञानाभावान्न द्वेषः संभव
ति तस्माद्धि स्वरूपयोग्यता फलोपधानं वा नापरं हि दुःखमिति स्वरूपयोग्यमन फलोपधायकमिति ज्ञानेऽपि तदभावात् न द्वितीयः
प्रायश्चित्तनाश्यपापस्य एव फलोपधायकत्वाभावेन द्वेष्याभावाप्रतीतेरिति वाच्यं स्वरूपयोग्यतायाः एव तथात्वात् फलानुपधायकत्वनिश्चय
स्य प्रतिबन्धकत्वम् इति नास्ति प्रसङ्गः नन्वेवं मुक्तिप्रतियोगिनि दुरिते फलानुपधायकत्वनिश्चयात् द्वेषानन्तादिकृतानि वा कानि तत्तच्चैकत्व
निवार्यं तत्सम्पिफलानुपधायकत्वेन निश्चयाभावात् तत्स्वरूपनिरूपफलत्वेनकसनात् यत्नफलोपधायकत्वस्य संशयनिश्चयता

धाणां ज्ञानमेव कारणमिति तदप्युक्तं तथा सति तदुपायेच्छिः कं यथमञ्जसानुपपत्तेः नच विशेषदृष्टिर्नाम कंपाप्रवृत्तिः नव धवृंतीवाभिरका
लमनुवर्त्तितुमर्हतीति यथार्थीयाः प्रवृत्तेर्यथार्थज्ञानसाध्यत्वाच्चेति विशिष्टस्य दुर्गतध्वंसे उद्देश्यो भवति जन्मते वृतत्वज्ञानेन ततो जन्मतावच्छे
दकं न वेसमर्थ्य इति तत्त्वज्ञानेनुत्पा पश्चित बदाहस्रै वर्गापनाराकंसीयंते नास्य कर्मीषिा तस्मिन्न्देबपरावार इति श्रुतेरितिवेभश्रुति विरोधात्तथा
हि एवं वर्ते पनब्रह्मलोकमभिसंपद्यते न स पुनरावर्त्तते इति परमात्मा प्रयस्य ब्रह्मलोके नो समानस्य मात्तिं काशे षान फलमाह ननु दुःख
साधनस्य दुरितस्य निवृत्तिर्न स पुनरावर्त्तते इति तु ब्रह्मलोकमिति विशेषतात्पर्यमनिवारणापत्ते हि सामागभावात्मिकोभाव्यात्
भवति भाष्यात् अनादिसंसारावर्जितशुभाशुभकर्मबीजनाशात्तत्त्वज्ञानसहकारत्वेन तेषु पुनरुत्पत्तीर्णसुहि कारणाभावात्प्रवर्ततरस्मात्पः
श्यपते वात्मज्ञानस्यापि कर्मशक्तिनाशकता आत्मज्ञानाग्निदग्धानि कर्मबीजानि न प्ररोहन्तीति तथा भगवतापि वासुदेवेनाप्युक्तं ज्ञा
नाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति अत्र च सर्वपदं प्रारब्धेतरपरं अन्यथा विदुषः सद्यः शरीरपातापत्तेः श्रुतिश्च तस्य तावदेवचि
रं यावन्न विमोक्ष्ये अथ संपत्स्य इति न विमोक्ष्ये न विमोक्ष्यते प्रारब्धकर्मणा अथ संपत्स्यते ब्रह्मलोकमभिसंपद्यत इत्यनेन पदुक्ते
नेनेत्यर्थः अत एव तत्त्वज्ञानस्य कायव्यूहमुखावभोगद्वारा शुभाशुभकर्मक्षयहेतुतोक्ता पापिकोक्तापास्तात्तस्मात्कायव्यूहजन्ये
कत्वेमानाभावात् कायव्यूहे तपःप्रभृतेरेव हेतुत्वात् किंच कल्पशतातिक्रमभोग्यानां नारकानन्तानां बहुवर्षभोग्यानां च स्वर्गादीनां
कृपमेकक्षणे भोगः संभाव्यो न च तावत्कालं दुःखहरत्वपरालपेवतानि वासनितत श्चैकदा सम्प्रदिशति ननु दुःखसाधनत्वे ज्ञा

पितावत्तोभोगः संभवतीति वाच्यं भवदिष्टानुरोधेन तावत्तावत्कालं संस्कृतार्थत्यागानौचित्यात् एतेनैवं विधात्मलाभाकाङ्क्षावतां देहाकार
विगमात्कथं वित्तिसंस्नैर्नैमित्तिकानुष्ठानं संभवतितराम् तदाहुः प्रारब्धफलानभिमानी कथं कर्मणि प्रवृत्तेत गलितश्चात्मतदाकृमात्रविभागः
त्वरूपं दृष्ट्वा यजेदिति किं चारम्भकर्मभिः प्रयोजनं मोक्षो हि ज्ञानैकाधीनः तथा चाह नास्त्यकृतः कृतेनेति मैवं यावद्देहमाविनाद्देहेका
शेषैः उक्तं हि ध्याननिष्पदीकृतमनसामपि समाननहितानामपि गृहेषानश्यतीवेति तदेवं विधानामपि मुक्त्यानदर्शनात्तदाच निम
नैमित्तिकाकरणे प्रत्यवायः स्यादिति कार्याणि तानि वाच्यावर्जनीयत्रिविधस्तेनस्मान्निवर्हणाद्वारेणापवर्गसहायीभवन्त्येवनास्त्यकृतः
कृतेनेति काम्याभिप्रायं ज्ञानाहितकाम्याभिप्रायं वा प्रयोगस्य कर्मभिः किं प्रयोजनं तत्तदाशोभेतपदिप्रयोजनं प्रपन्नतः प्रमाणान्तरेण
निर्णीय ज्ञानिनस्तत्कुर्युः किं च प्रपन्नमुक्तिर्नेति धार्येवं समापन्नेति मार्गं प्रवर्तेय मिथ्यादिनचेहांशाभावे प्रमाणाभावात् न च बाधवा
धकभावः तथाविधानामपि मुक्त्यानसंभवात् तदा च कर्मकर्त्रादिविभागज्ञानमपि संभवतीति सर्वं चेद्ज्ञानवतः कर्मविधान
त्वाद्देवाहिद्ध किं चाश्रोत्रियप्रज्ञाणामपि संस्कारवशादपि महत्तेः संभवाच्चावश्यं तत्कालीनो ऽध्यासो ऽवेक्षणीयः इष्टसाधनता
धियः संस्कारात्मनाहत्या एवाह्मात्द्विवक्षति हेतुस्वसंभवात् यथा पुष्करपलाश इति श्रुत्वा विदेहादिमत्वमात्मविदो ऽवगम्य
मे नचाभिमानादस्मद्देहादिमत्वे सिद्धे चैवं कर्मणो ज्ञानसमुच्चयपक्षा एवेक्षा परमविषयाम्नातो तैत्तिरिश्रुत्या कर्मफलसंबन्धाभावः

वस्तुतस्तु रागादेर्नोक्तोद्धारकत्वेन तत्त्वज्ञानेन सुखात्कृष्टादेवानंदात्मकब्रह्मणः प्राप्तौ साक्षात्कारात्मका उपयुज्यते ज्ञानकर्मणोस्तु
त्र्यपत्तनचतुर्ज्ञानविधानेन कर्मस्वरूपवारणमिति विद्याकरणाधिकरणे आचार्यैरुक्तः ननु कर्मजन्यत्वे मोक्षस्याभावः स्यात् यथा स्वर्गादिव
त्स्य पिता पश्चिः जन्यत्ववत्तु मभावत्वस्यापि प्रयोजकत्वात्तथा जन्यत्वेन विनाशित्वात् ध्वंसोऽपि नश्यति न च प्रतियोगिनः पुनरुन्मज्ज
नापत्तिः ध्वंसध्वंसस्य प्रतियोगिरूपत्वानंगीकारात् न च ध्वंसप्रागभावानवच्छिन्नकालस्य प्रतियोगिकालत्वनियमः एतस्य नि
यमः स्यात् प्रतियोग्यनुपलब्धिबाधितत्वात् एवं तल्लाघवसहकृतमप्रामाण्यात्स्यः इत्यपि स्यात् किं च जन्यत्वेन जन्यभावत्वेन वा ध्वंस
प्रतियोगिताके न सम्मानामनयतेघटपटादीनां ध्वंसप्रतिकूलनकताग्राहकं प्रमाणमेव जन्यमात्रजन्यभावमात्रयोरपि ध्वंसप्रतिया
योगित्वकालानंगहातीति च तस्मादेवं परिध्वंसत्वमेकं प्रमाणसिद्धमादित्युवा तथापि तेन काम्येन स्वर्ग योग्यस्यापि सह कारि विरहा
त्फलानुत्पादाने स्वर्गादेः कालविशेषावच्छिन्नत्वस्य श्रुतत्वादसंतत्वसाधनसाधनत्वानेनाकारेऽपि अस्यतद्धः त्वविज्ञानमेव नाश
कं कस्य तेषोऽपि तस्य पुनर्नरकवर्तत इति श्रुत्या नैतत्त्वबोधनाज्जन्यभावत्वेन तदनुमानप्रागप्रबाधितमेव न यथेह कर्मचितो
लोकः क्षीयते तथापरत्र क्षीयतीति स्वकाम्यकर्मफलस्य क्षयित्वमनुवदति अन्यथा नाहत्तिश्रुतिबाधापत्तेः न च समयोगयोरवि
रोधेन विनिवेशसंभवे विरोधबाधानुचितौ वाक्यतत्त्वपरमानंदप्राप्तिमोक्षो न जन्मः सत्तिज्ञानकर्मभ्यां अंग्यणवास्वाभिरुपेपाते

गी· र·
३६

36

यदाहुः विजयत्वात्मैवेतम मानंदो व्रजतेव यः यद्वै निमद्विभुत्वादितेनात्मानैवमुच्यते ब्रह्मलोकमभिसंपद्यत इति श्रुतिरपि तत्साम्राज्यम
भिव्यक्तिपर्य्यो यनेवं वदंति अभिव्यक्तिश्च मतिवैधकापनयेन यथालोकस्यांधकारापनयेनेन घटव्यंजकत्वात येहस्तेनोयानंदस्य ज्ञा
नस्य च शुभाशुभकर्मप्रतिबंधात्संबंधे विषयविषयिभावो न जायत इति तदयनयनमेव तथा च काशिकाकृतस्तत्सिद्धमानंदात्मा
समुच्चितोपनिषद्ज्ञानकर्मोपायो मोक्षो नित्यस्याप्यानंदो व्यज्यते न तु स्वर्गवत्कार्य इति यत्तु तत्साक्षात्कारस्य कारणमिति तद्व
वतुतथाविकारणात्किमिति वाच्यं नतु मन एवतथा अवागमना इति श्रुतिविरोधादिति पार्थसारथिमिश्रोक्तिरितरवांस्तदसत आ
नंदसाक्षात्कारो मुक्तिस्तत्साक्षात्कारो नेमतः संबंधेपि मोक्षावस्थामधिकृत्य सोत्कमनस्कत्वं न विरुध्यते अथ विकल्पकात्मकमनः
प्रतिबंधिके यश्रुतिः कामः संकल्पो विचिकित्साश्रद्धाऽश्रद्धा ह्रीधीर्भीरित्येवं श्रुतस्य तेनेन तादृशधर्माभावे मनसोप्यभावात् यत्तास्म
न आनंदरूपत्वे प्रमाणमेव नास्ति आनंदशब्दश्च गीतश्रवणस्त्रियालिंगनचंद्रदर्शनमधुरास्वादादिजन्यमाह्लादमेवाभिधत्ते
न चैवं रूपत्वेऽत्मनो मानमस्ति यथा हि वैषयिकसुखं ख्यानंदरूपत्वं प्रत्यभिजानीमो नैवमात्मनि प्रत्यभिज्ञा तस्मात् किं यद्यप्यस्य संवि
ज्ञानमानंदं ब्रह्मेति तद्धर्मधर्मिणोरभेदान्नीलोत्पलादिवत्सामानाधिकरण्यं परं ब्रह्मगुणामात्रं निष्ठानामपि शब्दानां गुणानि
मपोगो यथाशीतो मधुरो रसः स्निग्धो गुरुश्चेति रसशब्दस्य द्रव्यः यथाशीतादिशब्दसामानाधिकरण्यानुपपत्तेः किंचानंदस्वेवाय

सद्यानंदीभवतीति मल्पश्रुतिनिर्देशात् आनंदयोर्भेदोऽवगम्यते तथानंदं ब्रह्मणो विद्वान् एको ब्रह्मण आनंद इति षष्ठ्या आ
नंदात् ब्रह्मातिरिच्यते किंच न मे सुखं किंचिदपि किंतु दुःखमेव मे मेति सुखाभावे दुःखानुभवे चानुमीयमानत्वात्मनः कथमानं
दरूपता स्यात् किंच सुषुप्तिमुक्त्योर्मुक्तिः केवलं सुखमात्रानुभवस्य न तु इंद्रियमात्रे तु भिन्नं भिन्नस्वरूपयोः सम्मतिपन्नं सुषुप्त्यनुभवस्य अस्माक
मप्यस्ति तथा च श्रुतिः एताः प्रजा अहरहर्ब्रह्मलोकं यान्ति अहरहर्गच्छंतीति न चास्माकं तत्रानंदानुभवोऽस्ति तस्मान्निरानं
दो मोक्ष इति केचिदाहुः तदसमसारं तथा हि वयं हि भेदाभेदवादिनः सुषुप्त्यपूपन्नं आनंदत्वेनाननुभवत्वमभिमतत्वात् घ
सेवैषयिक एवानंदप्रत्यभिधीयत इति तत्र मानोऽप्यविद्यात्मिकाभिमानिका ह्लादेपितत्वयोगात् तस्मात्सर्वेषामाधाराणामा
नंदसाधारणानि वाक्यानि अधिकाराणामायेन तत्सुषुप्तिविवादिकमपोगामि सापि वर्तते तदा को विरोधः स्वं स्वे वा फलं चेति अपूर्वमपोऽस्ति
ईशान्यो जीवस्यानंदवत्तानं जगद्रूपास्यानंदरूपता या बाधिका आनंदं ब्रह्मेति वा नेयप्रतीत्यर्थे न चानंद आनंदपि तु सम र्थरस्मा
पो ब्रह्मण आनंदरूपतास्तीति नष्टसाधुतायवैकल्पिकमात्रपाणिपं आनंदं ब्रह्मणो विद्वान् इति सच ब्रह्मपदमनन्यग
तिकतया जीवपरिच्छिन्नार्थस्यायं प्रत्यग्य एवमेको ब्रह्मणः आनंदवजीवस्य मोक्षेऽपि स मामाण आनंदः स एक एव न तु वैषयिकादिवन्नो
नेत्यर्थः सुषुप्तमनुभवे स्पष्टत्वमहमस्वाप्सं इति निषाम शीत सुखमित्यस्मत्स्वविदित्यर्थः तद्वत् सुखं ब्रह्मात्मकमेवैवैषयिकमवि

मो. ध.
२७

सुषुप्तं निकर्षेणाभावात्ततस्तु मिथ्यावादः एवापंनानंदानुभवस्तत्रास्तीति यत्तु न मे सुखं किंचिदिति तदभिमतस्यानुभवादेव यत्तु सुखवि
शिष्टात्मानुभवः सुखार्थो न तु सुखमात्रानुभवो न च सुखमात्रात्मानुभवः संभवति विज्ञातारमरे केन विजानीयादिति श्रुत्यैव निषेधादिति तदिति
तुच्छं सुखस्यैव सुखार्थत्वात् श्रूयते तु सुखं जनितयेममयदेतत्तु वाऽस्माकं गुणगुणिभेदवादिनां तुल्येन सहैवैशिष्ट्यमस्ति वस्तुतस्तु सुखत्वेनास्फुरत्
क्रियमाणत्वेन कदाचित्सुखार्थत्वान्नैव हि सुखस्यापि सुखार्थत्वान्न तु सुखविशिष्टात्मास्फुरत्त्वेन न च सुखत्वमात्माकारदशायामात्मापि स्फुरति
अनुभवसाक्षिकमेतत् मुक्तेरव्यवहितभाक्काले जातस्यैव तादृशात्मास्फुरत्त्वस्यापामन्त इति स्वीकारेणाश्रुतिविरोधाभावात् अशरीरत्वाव
स्थितेन प्रियाप्रियस्पर्शस्यात्र प्रियशब्दस्तु सुखदुःखपरः हेतुनिर्देशोऽप्युपपत्तेः शरीर इति भोगो हि जायमानः शरीरावच्छेदेन जा
यते तदभावे च कथमात्मानं स्पृशतु कथमात्मसुखस्य मयेयातामिति पाठवत् मोक्षस्यानंदरूपतानुभवस्वर्गः स्यात् सर्वान्नमविशिष्टत्वादिति
अयतो भगवतो जैमिनेरपि संमतः सर्वपदं त्वश्राद्धे कोशान्नमनुष्ठमपि स्वर्गप्राप्तिस्वर्गपदं चातिशयितसुखवाचित्वेनापेक्षिकातिशयितपुण्यकर्म
मात्रस्य फलं मोक्षस्तु नापेक्षिकातिशयशालीत्यानकर्मणः फलमित्याशयः इदं तु विचार्यं जीवस्यानित्य आनंदो नित्योऽस्य च कुतः सिद्धया
वेति हि वाक्यानि ब्रह्मानंदपराणि ब्रह्मलक्षणस्य यतो वा इमानि भूतानि जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति तद्ब्रह्म तद्विजिज्ञासस्वेति वाक्या
दुपास्यमात्रपरः प्रत्यानंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुतेरेवमभारणांतराविरुद्धस्य स्वरूपेपि मभारामेव काशिकायां श्रीकाशिस्थचरितमि

राम
२७

37

ऽस्त्वेतदपि जगदुपास्यपरमेव प्रतिभातीति चेन्न तत्संबंधाभावान्मोक्षेऽप्रतिष्ठितमिदं सर्वस्याविशेषेण तत्प्रतिपादनं नोपपद्यत इत्यत्र ब्रह्मपदेन जीवस्य
लक्षणीयत्वात् आनंदमित्यानंद इति लाक्षणिकं मधुरः स्निग्धो रस इतिवत् छांदसो वा लिंगव्यत्यासः स्वधर्मैः मत्वर्थीयाच्प्रत्ययांतत्वेनानंद
युक्तं स्वरूपमिति वार्थः ब्रह्मलोकमभिसंपद्यत इति वाक्यशेषाद्भावापत्तिः फलं श्रूयते तथा ब्रह्मविद् ब्रह्मैव भवतीत्यादिवाक्याच्च न च ब्रह्मस्वरू
पता भवनयोग्येति ब्रह्मणो य आनंदः स जीवस्याप्यारक्षिपमाणात्मना प्राप्यते तत्साक्षात्कारवान् भवतीति फलितोऽर्थः ततश्च मोक्षे पूर्ववृत्ति
सहत्वविरहेपि न क्षतिरिति तु नवीनाः स्वसमानाधिकरणदुःखाधिकरणक्षणावृत्तिदुःखध्वंसो मोक्षस्तस्य चोत्कटेच्छाविषयत्वात्तत्साधनतया
प्रतियोगिनो दुःखस्याप्युपादेयत्वमित्याहुः केचित् तदपि वेदविरोधादुपेक्ष्यमिति ननु प्रतियोगितापि पदार्थांतरं न हि स्वरूपसंबंधेन तत्कार्य
निर्वाहः संभवति तथा हि घटो नास्तीत्यत्राभावेन सह घटस्य कः संबंधो घट एवेति चेन्न घटस्य संबंधत्वे प्रमाणाभावात् घटत्वमिव न वा संभवति
संयोगसमवाययोरेव संबंधव्यवहारस्य लोकसिद्धत्वात् भावांतरे ह संबंधव्यवहार इति चेत्तर्हि नास्त्येव संबंध इत्यापत्तेः किंच घटस्याभावत्वे च स्वात्म
येन ज्ञानतोपि न हि घटो नेत्यभावस्यापि तथा प्रतीतेरतिव्याप्तेश्च न चान्योन्याभावभिन्नत्वे सत्यभावत्वं तत्राप्यनुयोगस्य सत्वात् भवन्मते घटा
देरेवाभावत्वेन तस्य नित्यत्वाभावाच्च घटोऽपि ज्ञानात्मना नित्य इति चेत् मतं तथापि तद्घटे संसर्गाभावाव्याप्तिः प्रागभावध्वंसयोरव्याप्तिश्च तर्हि नित्य
पदेन देयमेवेति चेदस्त्वेवं पात्सोऽन्योन्याभावभेदो न संभवति सर्वस्यैवाभावस्य भावात्मकस्यान्योन्याभावात्मकतापाः स्वीकारात् नहि अन्योन्याभावत्ववि

त्वस्यानामभावत्वमेव तत्तद्वैलक्षण्यंप्रयुक्तमत्यंताभावत्वमेव अस्ति हि प्रागभावप्रध्वंसात्यंताभावेषान्योन्याभावत्वाभावः न चाभावेनाभावः सं
भवतिभावांतरमभावो हीतिसिद्धांतादित्तिवाच्यं तेषामपिभावांतरात्मकतयांगीकारादितिचेदस्त्वेवं तथापिप्रदातनसंसर्गाभावत्वमत्यं
ताभावत्वमिति तत्प्रविष्टं संसर्गाभावत्वमप्यापि न निरुक्तं प्रतियोगिवृत्तिरभावोऽत्यंताभाव इति चेन्नप्यकस्यचित्प्रतियोगिमयोऽभावो वृत्ते
तइसतिव्याप्तिः स्वप्रतियोगीस्त्व्यक्तावसंतानुगमः अन्योन्याभावत्वाह्वृत्तिरन्योन्याभावताभाव इतितश्चिर्वाच्यमितिचेत्किंहि तत्संसर्गा
भावत्वात्यंताभावत्वातिरिक्तं तादात्म्यावच्छिन्नप्रतियोगिताकत्वमितिचेन्न तादात्म्यघटितवृत्तिप्रमाधारणोधर्मस्तदाननुगमः किंचय
दोषोन्योन्याभावेपीमन्निव्याप्तिः अत एव प्रतियोगिसमानाधिकरणोऽभावोऽन्योन्याभावः सामानाधिकरण्यमेककालावच्छेदेनैकदेशे एकाव
च्छेदेन वर्तमानत्वं तेन ध्वंसप्रागभावात्यंताभावेषु नातिव्याप्तिरित्यपि निरस्तं प्रसकस्यचित्प्रतियोगिनासामानाधिकरण्यस्या
तिप्रसक्तत्वात् स्वप्रतियोगिसामानाधिकरण्यस्य चाननुगतत्वेन प्रागुक्तदोषात् तादात्म्यसंबंधांतरेण प्रतियोगिमति संबंधांतरेण सं
सर्गाभावे गतिव्याप्तिश्च एकसंबंधावच्छिन्नत्वविवक्षायामपि गगनान्योन्याभावाव्याप्तिः गगनाधिकरणाप्रसिद्धेः अथ प्रतियोग्यवृत्तिः
सार्वदिकाभावोऽन्योन्याभावः न च कालान्योन्याभावाव्याप्तिः दैशिकसंबंधेन तस्य भावस्य विवक्षितत्वात् इति चेन्न एवं लक्षणेन तद्दोष
तादवस्थ्यात् स्वप्रतियोगितायामपि वक्तृत्वजातेः स्वीकारेपि वस्तुत्वाभावस्य संबंधांतरावच्छिन्नस्य प्रतियोग्यवृत्तित्वाभावात् तत्रातिव्याप्त्यापत्तेश्च

एतेन तादात्म्यारोपजन्यप्रतीतिकाभावत्वमन्योन्याभावत्वमित्यपि परास्तं तादात्म्यस्याननुगतत्वात् आरोपस्य हेतुत्वे मानाभावात् बाधा
च्च तथा हि न तावदनाहार्यारोपत्वं यत् तस्याभावग्रहविरोधित्वात् नाप्याहार्यारोपत्वं तस्याभावग्रहतः प्रागसत्वात् एवं च सति संसर्गाभा
वकालेऽन्योन्याभावोपि गृह्येतेति तत्रैवापत्तिः अथ यदारोपनियामकमेव तन्नियामकं तस्योभयत्र सिद्धत्वात् अपि चानुमानिकाभावग्रहे
तस्य कारणतानवच्छेदित्वेऽतीन्द्रियान्योन्याभावाव्याप्तिः अथ संसर्गाभावासमविषयत्वं तदितरत्वाश्रयः किं च ज्ञानघटितमस्य तावच्छेदके
न तावदन्योन्याभावज्ञानत्वं तस्य प्रथमतोऽन्योन्याभावत्वाज्ञानेऽज्ञानात् न च तादात्म्यारोपानन्तरं यो भावबुद्धिर्जायते तद्बुद्धित्वं तस्यान्यो
न्याभावत्वाज्ञानेपि शक्यग्रहं वस्तुतोऽन्योन्याभावबुद्धेरेव तथात्वादिति वाच्यं तथापि जन्यज्ञानावच्छेदकं पदितस्त्वानन्त्वं तथा सति तज्ज्ञाना
विषयेऽव्याप्तिः अथ संसर्गाभावासमविषयत्वं न तदितरताश्रयः किं च ज्ञानघटितमिदमन्योन्याभावत्वमतीन्द्रियज्ञानवादिनां न मतमस्य योग्या
नुपलब्धिग्राह्यत्वं नापि मतस्य ज्ञानवादिनामपि चास्य संभवितुमर्हति अथ संबंधावच्छिन्नप्रतियोगिताकाभावत्वं तथा च संबंधावच्छिन्न
प्रतियोगिकत्वमस्य मित्यभावत्वमेवान्योन्याभावत्वं ध्वंसप्रागभावस्य च प्रतियोगितानसंबंधावच्छिन्नेति तत्रातिव्याप्तिवारणाय निर
पदमिति चेन्न विशेषणविशेष्यभिन्नत्वे सति विशिष्टप्रत्ययविषयत्वं हि संबंधत्वं तथा चान्योन्याश्रयः अथ संबंधत्वमखण्डोपाधिः तर्हि त
दपि पदार्थान्तरमिति विभागव्याघातः इति चेन्न नित्यधर्मत्वात्रेति चेत् एवं तथापि संबंधत्वं तादात्म्ये प्रसक्तिरभेदे न विशिष्टज्ञाने तस्मात

मी॰र॰
३९

39

याल्वात् तद्वत्तारात्म्येन घटत्वादितोरिति चेन्न मम मोन्याभावस्यापि संसर्गावच्छिन्नप्रतियोगिताकत्वं दुर्वारं अपसंबंधस्यावच्छेदकतारोप्यत्वमेवे
ति चेन्न अरोपस्य हेतुताया दूषितत्वात् तत्तु स्वमाप्यत्वात् विनश्यद्वस्य घटप्रमित्यनंतरं घटध्वंसप्रमासत्त्वे भिन्नाराच्च किंच नित्यत्वं प्रागभावाप्र
तियोगित्वे सति ध्वंसाप्रतियोगित्वं गंधानाधारसमवायानाधारोऽभावः प्रागभावो न तु प्रतियोगिजनकोऽभावः कारणताया अनन्यथासिद्धो
घेनियमांशे का मोन्याभावगर्भत्वात् ध्वंसस्य प्रागभावप्रतियोग्यभावः न तु जन्याभावो न्योन्याभावगर्भतापत्तेरिति चेन्न गंधानाधारत्वं परि
गंधाभावाधारत्वं तदा जन्यलाघवच्छेदेनायमपि समयत्तयेन्नित दृश्नित्वात् प्रागभावस्यासंभवः अत एव गंधाधारत्वाभाववत्त्वमपि न पदिच
गंधाधारभिन्नत्वं तदात्माश्रयादिः न च मीमांसकानां तादृशसमयो प्रसिद्धसंभवः न वा ध्वंसादिप्रसंगविनातत्समासिद्धिः ननु गंधत्वसा वि
करणानधिकरणसमयवृत्तिकार्यमात्रवृत्तिजातित्वादिति तत्सिद्धिरिति चेन्न गंधत्वस्य पक्षतावच्छेदकस्यान्योन्याभावगर्भत्वात् सा
ध्याप्रसिद्धिश्च स्वत्वाननुगमात् जातित्वस्यानित्यत्वघटितत्वात् समवायस्याप्रसिद्धेश्च अपि नित्यत्वं गोत्वव्यापकत्वं रदंचकालिकं
यात्त्वमिति चेन्न तद्विरहसमानाधिकरणासंताभावाप्रतियोगित्वं न चान्योन्याभावः कोऽपि तथा सर्वस्यैव तत्प्रतियोगितावच्छेदात्मक
त्वासंताभावसमानाधिकरणत्वात् न चात एव प्रतियोग्यसमानाधिकरणसंताभावविशेषणं देयमिति वाच्यं तद्भिन्नप्रतियोग्य
धिकरणवृत्तित्वाभावः सर्वेषामभावानां प्रतियोग्यधिकरणे महाकालेवृत्तेः नापि प्रतियोग्यभावाधिकरणवृत्तित्ववैयर्थ्यात् असंता

एमं
३९

मी॰ र॰
४०

40

भावत्वाद्यापत्तिर्निरुक्तेश्च न च प्रतियोग्यधिकरणाभिन्नवृत्तित्वं आत्मत्वाश्रयापत्तेः तस्मात्संसर्गाभावत्वान्योन्याभावत्वेमतीतिवत्त्वासद्-
र्यान्तरे इति न चैवं त्वप्रत्येयं तर्भावपि तु शक्येत तस्य कमाच्च वृत्तित्वात् अन्यथा सामान्यापत्वापापत्तेरिति चेद्दत्तूनः अनयोरभावत्वव्याप्य-
योरभावत्ववद्भावपदार्थयोरंतर्भावः योग्यानुपलब्धिगम्यत्वेनैवाभावस्य विभागात् प्रागभावध्वंसत्वे निरुक्ते एवत्वात्तावानुसंधेः सं-
यत्वं तु सामान्यांतर्गतमनुगतमसपविष्टुपत्वमेव सामान्यत्वं पदार्थविभाजकं तदाश्रयो द्विविधः भावमात्रवृत्तिस्तदितरश्च आद्यो जा-
तिरिति यद्वक्ष्यते अन्त्यस्तु संयोगोपाधिरिति शक्तिरपि तत्रस्थैव तदंतर्भूतैव वास्त्विति चेन्न तस्या यावत्समवृत्तितापा अपुपगमात् इति पदार्थप्रमेय-
ह्यैणास्याने ध्रुवपितुमिच्छास्ते विद्यालंकृतिकृतिनः कृतिरेषा कस्य तोषेन । किं वा युनाथस्य कृतिनः कृतिः कौशलशालिनी मी-
मांसातत्त्वजिज्ञासोर्भविता नंददायिनी २ ॥ ॥ इति विद्यालंकारश्रीरघुनाथभट्टाचार्यकृते मीमांसारत्ने प्रमाणप्रमेयविषि-
रत्नात्मके प्रमेयपालास्यो द्वितीयः परिच्छेदः समाप्तः श्रीरामः श्रीसंवत १९०४ ॥ २ ॥

एम॰
४०

मीमांसा:

न्याय